# 2016

## SANSKRIT

## [ Honours ]

PAPER – III

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

[ NEW SYLLABUS ]

1. वाणभट्टस्य रचनाशैलीं पठितविषयाधारेण आलोचयत । 10

*अथवा*

महाश्वेतायाः सौन्दर्यवर्णनं कुरुत ।

2. संस्कृतभाषया देवनागरलिप्या च एकं व्याख्येयम्— 6

पञ्च–महाभूतमयमपहाय द्रव्यात्मकम् अङ्गनिष्पादनोपकरण-कलापं धवलगुणेनेव केवलेनोत्पादिताम् , दक्षाध्वरक्रियामि-वोद्धतगण–कच–गअह भयोपसेवितत्र्यम्बकाम् ।

*अथवा*

द्यूतकला–कुशलामिव वशीकृताक्षहृदयाम्, महीमिवजल-भृतदेहाम्, हिमसमय-दिवस' मुखलक्ष्मीमिव परिगृहीत भास्करातपाम्, आर्यामिव समुपात्त–यतिगणोचित–मात्राम्, अलिखितमिवाचलावस्थानाम्, ।

3. सरलसंस्कृतेन देवनागरलिप्या च प्रश्नचतुष्टयं समाधेयम्— 4×1

(*a*) चन्द्रापीडः कुत्र कथं कन्यकां ददर्श ?

(*b*) गङ्गया सह सा कन्या कथं तुलनीया ?

(*c*) यौवनं कदा कथम् आगतम् ?

(*d*) कन्यायाः दृष्टिः कीदृशी ?

(*e*) कन्यया सह संगीतस्य संपर्कः कथं आसीत् ?

(*f*) केन कारणेन सा कन्या सहचरीभिः परिवृता इव दृष्टा ?

4. सूर्यवंशस्य परिचयं पठितांशमवलम्ब्य प्रतिपादयत । 10

*अथवा*

रघुवंशस्य प्रथमसर्गानुसारम् आश्रमवर्णनं कुरुत ।

5. संस्कृतभाषया देवनागरलिप्या च एकं व्याख्येयम्— 6

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

*अथवा*

हविरावर्जितं होतस्त्वया विधिवदग्निषु ।
वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम् ।

6. सरलसंस्कृतेन देवनागरलिप्या च प्रश्नचतुष्टयं समाधेयम्— 4 × 1

(*a*) करग्रहणावसरे दिलीपस्य आदर्शः कः ? का च तस्य नीतिः ?

(*b*) कालिदासस्य कृतयः काः ?

(*c*) दिलीपस्य वृद्धत्वं कीदृशम् ?

(*d*) लोकालोकः पर्वतः कः ?

(*e*) नन्दिनी का आसीत् ? नन्दिन्याः गात्रवर्णः कीदृशः ?

(*f*) 'मघवा' कः ? सः किमर्थं स्वर्गलोकं दुदोह ?

7. युधिष्ठिरं प्रति वनेचरस्य उक्तीः वर्णयत । 10

*अथवा*

किरातार्जुनीयस्य प्रथमसर्गमाश्रित्य भारवेः अर्थगौरवं निरूपयत ।

8. संस्कृतभाषया देवनागरलिपया च एकं व्याख्येयम्— 7

कृतप्रमाणस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो नहि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।।

*अथवा*

अबन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव संपदः ।
अमर्शशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ।।

9. सरलसंस्कृतेन देवनागरलिप्या च पञ्चानाम् उत्तरं लिखत— 5 × 1

(*a*) किम्भूतं वचनं दुर्लभम् ?

(*b*) कथं दुर्योधनस्य त्रिगणः परस्परं न वाधते ?

(*c*) दुर्योधनः धर्मविप्लवं कथं निहन्ति ?

(*d*) के पराभवं व्रजन्ति ?

(*e*) युधिष्ठिरं प्रति द्रौपद्याः कः अन्तिम उपदेशः आसीत् ?

(*f*) भीमः कथं वने दुःखं प्राप्तवान् ?

(*g*) राजानः किमर्थं न वञ्चनीयाः ?

10. (*a*) एकस्य व्यासवाक्येन सह समासरूपं निर्णय— 1 × 1

अवन्ध्यः, सपत्नेन ।

(*b*) एकस्य कारकविभक्तिः निर्णेया— 1 × 1

(*i*) कृतप्रमाणस्य महीं महीभुजे ।

(*ii*) अमर्शशून्येन जनस्य जन्तुना ।

(*c*) एकस्य प्रकृति-प्रत्ययौ निरूप्येताम्— 1 × 1

इच्छन्ति, विहन्ता ।

11. अम्बराद्वतरतो नारदस्य वर्णनं कुरुत । 10

*अथवा*

'माघे सन्ति त्रयो गुणाः' पठितांशमवलम्ब्य इमामुक्तिं प्रतिपादयत ।

12. संस्कृतभाषया देवनागरलिप्या च सप्रसङ्गम् एकं व्याख्येयम्— 7

नवानधोऽधो बृहतः पयोधरान्
समूढकर्पूरपरागपाण्डुरम् ।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना
स्फुटोपमं भूतिसितेन शम्भुना ।।

*अथवा*

अभीक्ष्णमुष्णैरपि तस्य सोष्मणं
सुरेन्द्रवन्दीश्वसितानिलैर्यथा ।
सचन्दनाम्भः कणकोमलैस्तथा
वपुर्जलार्द्रापवनैर्न निर्ववौ ।।

13. सरलसंस्कृतेन देवनागरलिप्या उत्तरं लिखत (पञ्चानाम्)— 5 × 1

(*a*) शिशुपालः कः ? तस्य मातापितरौ कौ स्तः ?

(*b*) नारदः कस्य वार्तया सह कस्य सकाशम् आगतः ? सा वार्ता का आसीत् ?

(*c*) माघकाव्यस्य टीकाचतुष्टयस्य नामानि लिखत ।

(*d*) 'क्रमादमुं नारद इत्यबोधि सः'– 'सः' पदेन कः बोध्यः ? सः नारदं कथं ज्ञातवान् ?

(*e*) कश्च उपेन्द्रः ? कथं तस्य एतत् नाम ?

(*f*) 'सुपात्रनिक्षेपनिराकुलात्मना', कश्च सुपात्रम् ? केन किं कस्मिन् निक्षिप्तम् ?

(*g*) मदमत्तहस्तिना सह रावणः कथमुपमितः अभवत् ?

14. (*a*) एकस्य व्यासवाक्येन सह समासरूपं लिखत— 1 × 1

स्फुटोपमम्, सोष्मणः ।

(*b*) प्रकृतिप्रत्ययौ निर्णयत (एकस्य)— 1 × 1

समूढः, श्वसितः ।

(*c*) अव्ययपदेन संस्कृतेन वाक्यं रचय (एकस्य)— 1 × 1

यथा, तथा ।